श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ पादुकासहस्रम् ॥

## ॥ मुक्तापद्धतिः अष्टादशी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ मुक्तापद्धतिः अष्टादशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

बद्धानां यत्र नित्यानां मुक्तानामीश्वरस्य च।
प्रत्यक्षं शेषशेषित्वं सा मे सिद्ध्यतु पादुका॥ १८.१ ॥

तव रङ्गधुरीणपादरक्षे ! विमला मौक्तिकपद्धतिर्विभाति।
सुहृदि त्वयि साधितापवर्गैः समये सङ्क्रमितेव साधुकृत्या॥ १८.२ ॥

शरणागतसस्यमालिनीयं तव मुक्तामणिरश्मिनिर्झरौघैः।
ननु रङ्गधुरीणपादरक्षे ! जगतीं नित्यमदैवमातृकाऽभूत्॥ १८.३ ॥

अधिविष्णुपदं परिस्फुरन्ती नवमुक्तामणिनिर्मलप्रकाशा।
परिपुष्यसि मङ्गळानि पुंसां प्रतिपच्चन्द्रकलेव पादुके ! त्वम्॥ १८.४ ॥

निहिता नवमौक्तिकावळिस्त्वाम् अभितः काञ्चनपादुके ! मुरारेः।
नखचन्द्रमसां पदाश्रितानां प्रतिमाचन्द्रपरम्परेव भाति॥ १८.५ ॥

समतामुपैति वपुषाऽपि सदा भवदीयमौक्तिकमहश्छुरिता।
हरिपादुके ! हरिपदोद्भवया कनकापगा सुरपुरापगया॥ १८.६ ॥

तव रङ्गचन्द्रतपनीयपादुके ! विमला समुद्वहति मौक्तिकावळिः।
चरणारविन्दनखचन्द्रमण्डलप्रणयोपयातनवतारकारुचिम्॥ १८.७ ॥

चन्द्रचूडमकुटेन लाळिता चारुमौक्तिकमयूखपाण्डरा।
रङ्गनाथपदपद्मसङ्गिनी लक्ष्यसे सुरधुनीव पादुके !॥ १८.८ ॥

ये भजन्ति भवतीं तवैव ते मौक्तिकद्युतिविकल्पगङ्गया।
वर्धयन्ति मधुवैरिपादुके ! मौळिचन्द्रशकलस्य चन्द्रिकाम्॥ १८.९ ॥

मुक्तामयूखैर्नियतं त्वदीयैः आपूरयिष्यन्नवतंसचन्द्रम्।
बिभर्ति रङ्गेश्वरपादरक्षे ! देवो महान् दर्शितसन्नतिस्त्वाम्॥ १८.१० ॥

परिष्कृता मौक्तिकरश्मिजालैः पदस्य गोप्त्री भवती मुरारेः।
भवत्यनेकोर्मिसमाकुलानां पुंसां तमः सागरपोतपात्री॥ १८.११ ॥

रङ्गेशपादप्रतिपन्नभोगां रत्नानुविद्धैर्महितां शिरोभिः।
मुक्तावदातां मणिपादुके ! त्वां मूर्तिं भुजङ्गाधिपतेः प्रतीमः॥ १८.१२ ॥

मुकुन्दपादावनि ! मौक्तिकैस्ते ज्योत्स्नामयं विश्वमिदं दिवाऽपि।
वैमानिकानां न भजन्ति येन व्याकोचतामञ्जलिपद्मकोशाः॥ १८.१३ ॥

समाश्रितानामनघां विशुद्धिं त्रासव्यपायं च वितन्वती त्वम्।
सायुज्यमापादयसि स्वकीयैः मुक्ताफलैर्माधवपादुके ! नः॥ १८.१४ ॥

अवैमि पादावनि ! मौक्तिकानां कीर्णामुदग्रैः किरणप्ररोहैः।
यात्रोत्सवार्थं विहितां मुरारेः अभङ्गुरामङ्कुरपालिकां त्वाम्॥ १८.१५ ॥

शिवत्वहेतुं सकलस्य जन्तोः स्रोतोविशेषैः सुभगामसङ्ख्यैः।
मुक्तामयूखैः सुरसिन्धुमन्यां पुष्णासि रङ्गेश्वरपादुके ! त्वम्॥ १८.१६ ॥

रङ्गे शयानस्य पदावनि ! त्वां लावण्यसिन्धोः सविधे निषण्णाम्।
परिस्फुरन्मौक्तिकजालदृश्यां प्रसूतिभिन्नां प्रतियन्ति शुक्तिम्॥ १८.१७ ॥

अवैमि रङ्गेश्वरपादरक्षे ! मुक्ताफलानि त्वयि निस्तुलानि।
तेनैव कल्पान्तरतारकाणाम् उप्तानि बीजानि जगद्विधात्रा॥ १८.१८ ॥

विक्रम्यमाणमभवत् क्षणमन्तरिक्षं
मायाविना भगवता मणिपादरक्षे !।
व्योमापगाविपुलबुद्बुददर्शनीयैः
मुक्ताफलैस्तव शुभैः पुनरुक्ततारम्॥ १८.१९ ॥

लक्ष्मीविहाररसिकेन पदावनि ! त्वं
रक्षाविधौ भगवता जगतो नियुक्ता।

सत्त्वं तदर्हमिव दर्शयसि प्रभूतं
    मुक्तामयूखनिकरेण विसृत्वरेण॥ १८.२० ॥

पादार्पणेन भवतीं प्रतिपद्यमाने
    श्रीरङ्गचन्द्रमसि सम्भृतमौक्तिकश्रीः।
अङ्गीकरोषि चरणावनि ! कान्तिमग्र्याम्
    उद्भिद्यमानकुमुदेव कुमुद्वती त्वम्॥ १८.२१ ॥

त्रय्यन्तहर्म्यतलवर्णसुधायितेन
    ज्योत्स्नाविकल्पितरुचा मणिपादुके ! त्वम्।
मुक्तामयी मुरभिदङ्घ्रिसरोजभाजां
    वर्णेन ते शमयसीव सतामवर्णम्॥ १८.२२ ॥

वैकुण्ठपादनखवासनयेव नित्यं
    पादावनि ! प्रसुवते तव मौक्तिकानि।
अच्छिन्नतापशमनाय समाश्रितानाम्
    आलोकमण्डलमिषादमृतप्रवाहम्॥ १८.२३ ॥

रामानुवृत्तिजटिले भरतस्य मौळौ
    रङ्गाधिराजपदपङ्कजरक्षिणि ! त्वम्।
एकातपत्रितजगत्त्रितया द्वितीयं
    मुक्तांशुभिः कृतवती नवमातपत्रम्॥ १८.२४ ॥

पादावनि ! स्फुटमयूखमधुप्रवाहा
    मुग्धा परिस्फुरति मौक्तिकपद्धतिस्ते।
रूढस्य रङ्गपतिपादसरोजमध्ये
    रेखात्मनः सुरतरोरिव पुष्पपङ्क्तिः॥ १८.२५ ॥

आम्रेडितैः पदनखेन्दुरुचा मनोज्ञैः
    मुक्तांशुभिर्मुरभिदो मणिपादुके ! त्वम्।
स्वाभाविकीं सकलजन्तुषु सार्वभौमीं
    प्रायः प्रसक्तिममलां प्रकटीकरोषि॥ १८.२६ ॥

निस्सीमपङ्कमलिनं हृदयं मदीयं
　　नाथस्य रङ्गवसतेरधिरोढुमिच्छोः।
मातस्तवैव सहसा मणिपादरक्षे !
　　मुक्तांशवः स्फटिकसौधतुलां नयन्ति॥ १८.२७ ॥

श्यामा तनुर्भगवतः प्रतिपन्नतारा
　　त्वं चन्द्रिका विमलमौक्तिकदर्शनीया।
स्थाने तदेतदुभयं मणिपादरक्षे !
　　बोधं क्षणान्नयति बुद्धिकुमुद्वतीं नः॥ १८.२८ ॥

उद्गाढपङ्कशमनैर्मणिपादरक्षे !
　　मुक्तांशुभिर्मुरभिदो नखरश्मिभिन्नैः।
चूडापदेषु निहिता त्रिदशेश्वराणां
　　तीर्थोदकैः स्नपयसीव पदार्थिनस्तान्॥ १८.२९ ॥

रङ्गेशपादनखचन्द्रसुधानुलेपं
　　सम्प्राप्य सिद्धगुळिका इव तावकीनाः।
संसारसञ्ज्वरजुषां मणिपादरक्षे !
　　सञ्जीवनाय जगतां प्रभवन्ति मुक्ताः॥ १८.३० ॥

भावोत्तरैरधिगता भरतप्रधानैः
　　प्रत्युप्तमौक्तिकमिषेण विकीर्णपुष्पा।
रङ्गेश्वरस्य नियतं त्वयि लास्यभाजो
　　रङ्गस्थलीव ललिता मणिपादुके ! त्वम्॥ १८.३१ ॥

मन्ये मुकुन्दचरणावनि ! मौळिदेशे
　　विन्यस्य देवि ! भवतीं विनतस्य शम्भोः।
आपादयन्त्यधिकृताः प्रतिपन्नतारं
　　चूडातुषारकिरणं तव मौक्तिकौघैः॥ १८.३२ ॥

पद्मापतेर्विहरतः प्रियमाचरन्ती
　　मुक्तामयूखनिवहैः पुरतो विकीर्णैः।

कन्दानि काञ्चनपदावनि ! पद्मिनीनां
मन्ये विनिक्षिपसि मन्दिरदीर्घिकासु॥ १८.३३ ॥

आशास्य नूनमनघां मणिपादरक्षे !
चन्द्रस्य वारिधिसुतासहजस्य वृद्धिम्।
धात्रीं मुकुन्दपदयोरनपायिनीं त्वां
ज्योत्स्ना समाश्रयति मौक्तिकपङ्क्तिलक्ष्यात्॥ १८.३४ ॥

ये नाम केऽपि भवतीं विनयावनम्रैः
उत्तंसयन्ति कृतिनः क्षणमुत्तमाङ्गैः।
इच्छन्ति रङ्गनृपतेर्मणिपादरक्षे !
त्वन्मौक्तिकौघनियतामिह ते विशुद्धिम्॥ १८.३५ ॥

अनुदिनलळितानामङ्गुलीपल्लवानां
जनितमुकुळशोभैर्देवि ! मुक्ताफलैस्त्वम्।
प्रकटयसि जनानां पादुके ! रङ्गभर्तुः
पदसरसिजरेखा पाञ्चजन्यप्रसूतिम्॥ १८.३६ ॥

बलिविमथनवेलाव्यापिनस्तस्य विष्णोः
पदसरसिजमाध्वी पावनी देवि ! नूनम्।
जननसमयलग्नां जाह्नवी तावकानां
वहति चरणरक्षे ! वासनां मौक्तिकानाम्॥ १८.३७ ॥

मधुरिपुपदमित्रैर्वैरमिन्दोः सरोजैः
शमयितुमिव ताराः सेवमानाश्चिरं त्वाम्।
प्रचुरकिरणपूराः पादुके ! संश्रितानां
कलिकलुषमशेषं क्षाळयन्तीव मुक्ताः॥ १८.३८ ॥

मुकुळितपरितापां प्राणिनां मौक्तिकैः स्वैः
अमृतमिव दुहानामाद्रिये पादुके ! त्वाम्।
विषधरफणपङ्क्तिर्यत्प्रभावेन मन्ये
लळितनटनयोग्यं रङ्गमासीन्मुरारेः॥ १८.३९ ॥

सकृदपि विनतानां त्रासमुन्मूलयन्तीं
    त्रिभुवनमहनीयां त्वामुपाश्रित्य नूनम्।
न जहति निजकान्तिं पादुके ! रङ्गभर्तुः
    चरणनखमणीनां सन्निधौ मौक्तिकानि॥ १८.४० ॥

भुवनमिदमशेषं बिभ्रतो रङ्गभर्तुः
    पदकमलमिदं ते पादुके ! धारयन्त्याः।
चिरविहरणखेदात् सम्भृतानां भजन्ति
    श्रमजलकणिकानां सम्पदं मौक्तिकानि॥ १८.४१ ॥

प्रकटितयशसां ते पादुके ! रङ्गभर्तुः
    द्विगुणितनखचन्द्रज्योतिषां मौक्तिकानाम्।
करणविलयवेळाकातरस्यास्य जन्तोः
    शमयति परितापं शाश्वती चन्द्रिकेयम्॥ १८.४२ ॥

दिव्यं धाम स्थिरमभियतां देवि ! मुक्तामणीनां
    मध्ये कश्चिद्भवति मधुजित्पादुके ! तावकानाम्।
न्यस्तो नित्यं निजगुणगणव्यक्तिहेतोर्भवत्याम्
    आत्मज्योतिश्शमिततमसां योगिनामन्तरात्मा॥ १८.४३ ॥

शुद्धे नित्यं स्थिरपरिणतां देवि ! विष्णोः पदे त्वाम्
    आस्थानींताममितविभवां पादुके ! तर्कयामि।
आलोकैः स्वैर्भुवनमखिलं दीपवत् व्याप्य कामं
    मुक्ताः शुद्धिं यदुपसदनात् बिभ्रति त्रासहीनाः॥ १८.४४ ॥

प्राप्ता शौरेश्चरणकमलं पादुके ! भक्तिभाजां
    प्रत्यादेष्टुं किमपि वृजिनं प्रापिता मौळिभागम्।
देवेन त्वं दशशतदृशा दन्तिराजस्य धत्से
    मूर्ध्नि न्यस्ता मुखपटरुचिं मौक्तिकानां प्रभाभिः॥ १८.४५ ॥

तव हरिपादुके ! पृथुळमौक्तिकरत्नभुवः
    प्रचलदमर्त्यसिन्धुलहरीसहधर्मचराः।

पदमजरामरं विदधते कथमम्ब ! सतां
    प्रणतसुरेन्द्रमौळिपलितङ्करणाः किरणाः॥ १८.४६ ॥

कपर्दे कस्यापि क्षितिधरपदत्रायिणि ! तथा
    मुहुर्गङ्गामन्यां क्षरति तव मुक्तामणिमहः।
मुधारम्भः कुम्भस्थलमनुकलं सिञ्चति यथा
    निरालम्बो लम्बोदरकळभशुण्डालचुळकः॥ १८.४७ ॥

मुकुन्दपदरक्षिणि ! प्रगुणदीप्तयस्तावकाः
    क्षरन्त्यमृतनिर्झरं कमपि मौक्तिकग्रन्थयः।
मनागपि मनीषिणो यदनुषङ्गिणस्तत्क्षणात्
    जरामरणदन्तुरं जहति हन्त तापत्रयम्॥ १८.४८ ॥

देवः श्रीपदलाक्षया तिलकितस्तिष्ठत्युपर्येव ते
    गौरीपादसरोजयावकधनी मूले समालक्ष्यते।
इत्थं जल्पति दुर्मदान्मुरभिदः शुद्धान्तचेटीजने
    प्रायस्त्वं मणिपादुके ! प्रहसिता मुक्तामयूखच्छलात्॥ १८.४९ ॥

रङ्गेशचरणरक्षा सा मे विदधातु शाश्वतीं शुद्धिम्।
यन्मौक्तिकप्रभाभिः श्वेतद्वीपमिव सह्यजाद्वीपम्॥ १८.५० ॥

॥ इति श्रीपादुकासहस्रे मुक्तापद्धतिः अष्टादशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥